# ॥ વક્રતુણ્ડગણેશકવચમ્ ॥

.. vakratuNDagaNeshakavacham ..

sanskritdocuments.org

September 11, 2017

# .. vakratuNDagaNeshakavacham ..

# ॥ વક્રતુણ્ડગણેશકવચમ્ ॥

## Sanskrit Document Information

Text title : vakratuNDagaNeshakavach

File name : vakratuNDakavach.itx

Category : kavacha, ganesha

Location : doc_ganesha

Author : bhRigu

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com)

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : February 12, 2005

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

શ્રી ગણેશાય નમઃ ।
મૌલિં મહેશપુત્રોઽવ્યાદ્ભાલં પાતુ વિનાયકઃ ।
ત્રિનેત્રઃ પાતુ મે નેત્રે શૂર્પકર્ણોઽવતુ શ્રુતી ॥ ૧॥

હેરમ્બો રક્ષતુ ઘ્રાણં મુખં પાતુ ગજાનનઃ ।
જિહ્વાં પાતુ ગણેશો મે કણ્ઠં શ્રીકણ્ઠવલ્લભઃ ॥ ૨॥

સ્કન્ધૌ મહાબલઃ પાતુ વિઘ્નહા પાતુ મે ભુજૌ ।
કરૌ પરશુભૃત્પાતુ હૃદયં સ્કન્દપૂર્વજઃ ॥ ૩॥

મધ્યં લમ્બોદરઃ પાતુ નાભિં સિન્દૂરભૂષિતઃ ।
જઘનં પાર્વતીપુત્રઃ સક્થિની પાતુ પાશભૃત્ ॥ ૪॥

જાનુની જગતાં નાથો જઙ્ઘે મૂષકવાહનઃ ।
પાદૌ પદ્માસનઃ પાતુ પાદાધો દૈત્યદર્પહા ॥ ૫॥

એકદન્તોઽગ્રતઃ પાતુ પૃષ્ઠે પાતુ ગણાધિપઃ ।
પાર્શ્વયોર્મોદકાહારો દિગ્વિદિક્ષુ ચ સિદ્ધિદઃ ॥ ૬॥

વ્રજતસ્તિષ્ઠતો વાપિ જાગ્રતઃ સ્વપતોઽશ્નતઃ ।
ચતુર્થીવલ્લભો દેવઃ પાતુ મે ભુક્તિમુક્તિદઃ ॥ ૭॥

ઇદં પવિત્રં સ્તોત્રં ચ ચતુર્થ્યાં નિયતઃ પઠેત્ ।
સિન્દૂરરક્તઃ કુસુમૈર્દૂર્વયા પૂજ્ય વિઘ્નપમ્ ॥ ૮॥

રાજા રાજસુતો રાજપત્ની મન્ત્રી કુલં ચલમ્ ।
તસ્યાવશ્યં ભવેદ્વશ્યં વિઘ્નરાજપ્રસાદતઃ ॥ ૯॥

સમન્ત્રયન્ત્રં યઃ સ્તોત્રં કરે સંલિખ્ય ધારયેત્ ।
ધનધાન્યસમૃદ્ધિઃ સ્યાત્તસ્ય નાસ્ત્યત્ર સંશયઃ ॥ ૧૦॥

અસ્ય મન્ત્રઃ ।
ઐં ક્લીં હ્રીં વક્રતુણ્ડાય હું ।
રસલક્ષં સદૈકાગ્ર્યઃ ષડઙ્ગન્યાસપૂર્વકમ્ ।
હુત્વા તદન્તે વિધિવદષ્ટદ્રવ્યં પયો ઘૃતમ્ ॥ ૧૧॥

યં યં કામમભિધ્યાયન્ કુરુતે કર્મ કિઞ્ચન ।
તં તં સર્વમવાપ્નોતિ વક્રતુણ્ડપ્રસાદતઃ ॥ ૧૨॥

ભૃગુપ્રણીતં યઃ સ્તોત્રં પઠતે ભુવિ માનવઃ ।
ભવેદવ્યાહતૈશ્વર્યઃ સ ગણેશપ્રસાદતઃ ॥ ૧૩॥

॥ ઇતિ ગણેશરક્ષાકરં સ્તોત્રં સમાપ્તમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. vakratuNDagaNeshakavacham ..

Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996

on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*